भेदः। दाहवैवर्ण्यजननोनेत्ररोगप्रकोपनः” सुश्रुतः। “भवति वपुरवाप्तच्छायमेवातपेऽपि” माघः।“आतपात्ययसंक्षिप्तनीवाराषु निषादिभिः” रघुः। “तमातपक्लान्तमनातपत्रम्” रघुः।“शृङ्गाणि यस्यातपवन्ति सिद्धाः” कुमा०। “शीतातपाभिघाताश्च विविधानि भयानि च” मनुः। आतपश्च विरलसंयोगापन्नः सूर्य्यस्य किरणभेदः स एव रौद्रशब्दाभिधेयः प्रकाशस्तु ततोऽपि विरलसंयोगापन्न इति प्रकाशरौद्रयोर्भेदः। अस्य च निविडतेजस्त्वादुष्णस्पर्शवत्त्वम् तेन दुःखदायकत्वं मनुनोक्तम्। एवं “आतापतापितभूमौ माधव! माधव! मा धावेति” यशोदावाक्येऽपि। २ प्रकाशे “छायातपौ ब्रह्मविदो वदन्ति” श्रुतिः।

**आतपत्र** न० आतपात् त्रायते त्रै-क। छत्रे। स्वार्थे कन्। आतपत्रकमप्यत्र। “तमातपक्लान्तमनातपत्रम्”। “एकातपत्रं जगतः प्रभुत्वम्”। “पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम्” इति च रघुः। “राज्यं स्वहस्तधृतदण्डमिवातपत्रम्” शकु०। “तस्यातपत्रं बिभराम्बभूवे” माघः। “निजातपत्रस्य तलस्थले नलः” नैष०आतपत्रोत्पत्तिर्यथा भार० आनु० प० ६२,६३ अ०। “यदिदं श्राद्धकृत्येषु दीयते भरतर्षभ!। छत्रञ्चोपानहौ चैव केनैतत् संप्रवर्त्तितम्। कथञ्चैतत् समुत्पन्नं किमर्थञ्चैव दीयते। न केवलं श्राद्धकृत्ये पुण्यकेष्वपि दीयते। बहुष्वपि निमित्तेषु पुण्यमाश्रित्य दीयते। एतद्विस्तरतो ब्रह्मन्! श्रोतुमिच्छामि तत्त्वतः। भीष्म उवाच। शृणु राजन्नवहितश्छत्रोपानहविस्तरम्। यथैतत् प्रथितं लोके यथा चैतत् प्रवर्त्तितम्। यथा चाक्षयतां प्राप्तं पुण्यताञ्च यथा गतम्। सर्वमेतदशेषेण प्रवक्ष्यामि नराधिप!। जमदग्नेश्च संवादं सूर्य्यस्य च महात्मनः। पुरा स भगवान्साक्षाद्धनुषाऽक्रीडत प्रभो!। सन्धाय सन्धाय शरांश्चिक्षेप किल भार्गवः। तान् सर्व्वान् रेणुका क्षिप्तांस्तस्येषून् दीप्ततेजसः। आनीय सा तदा तस्मै प्रादादसकृदच्युत!। अथ तेन स शब्देन ज्यायाश्चैव शरस्य च। प्रहृष्टः सम्प्रचिक्षेप सा च प्रत्याजहार तान्। ततो मध्याह्नमारूढे ज्यैष्ठामूले दिवाकरे। स सायकान् द्विजो मुक्त्वा रेणुकामिदमब्रवीत्। गच्छानय विशालाक्षि! शरानेतान् धनुश्च्युतान्। यावदेतान् पुनः सुभ्रु! क्षिपामीति जनाधिप!। सा गच्छन्त्यन्तरा छायां वृक्षमाश्रित्य भाविनी। तस्थौ तस्य हि सन्तप्तं शिरः पादौ तथैव च। स्थित्वा सा तु मुहूर्त्तं वै भर्त्तुः शापभयाच्छुभा। ययावानयितुं भूयः सायकानसितेक्षणा। प्रत्याजगाम च शरांस्तानादाय यशस्विनी। सा वै खिन्ना सुचार्वङ्गी पद्भ्यां दुःखं नियच्छती। उपाजगाम भर्त्तारं भयाद्भर्त्तुः प्रवेपती। स तामृषिस्तदा क्रुद्धो वाक्यमाह शुभाननाम्। रेणुके! किं चिरेण त्वमागतेति पुनः पुनः। रेणुकोवाच। शिरस्तावत् प्रदीप्तं मे पादौ चैव तपोधन!। सूर्य्यतेजोनिरुद्धाऽहं वृक्षच्छायां समाश्रिता। एतस्मात् कारणाद्ब्रह्मंश्चिरायैतत् कृतं मया। एतच्छ्रुत्वा मम विभो! मा क्रुधस्त्वं तपोधन!। जमदग्निरुवाच। अद्यैनं दीप्तकिरणं रेणुके! तव दुःखदम्। शरैर्निपातयिष्यामि सूर्य्यमस्त्राग्नितेजसा। भीष्म उवाच। स विस्फार्य्य धनुर्द्दिव्यं गृहीत्वा च शरान् बहून्। अतिष्ठत् सूर्य्यमभितो यतो याति ततोमुखः” । इत्येवं क्रोधेन आत्मानं (सूर्य्यं) पातयितुमिच्छवे जमदग्नये विप्ररूपं धृत्वागत्य तं च परितोष्य तस्मै छत्रमुपानहौ च सूर्य्योददाविंत्युक्तं ततोऽध्यायान्तरे यथा।

“एतावदुक्त्वा स तदा तूष्णीमासीद्भृगूत्तमः। अथ सूर्य्योऽददत्तस्मै छत्रोपानहमाशु वै। सूर्य्य उवाच। महर्षे! शिरसस्त्राणं छत्रं मद्रश्मिवारणम्। प्रतिगृह्णीष्व पद्भ्याञ्च त्राणार्थं चर्म्मपादुके। अद्यप्रभृति चैवेह लोके सम्प्रचरिष्यति। पुण्यकेषु च सर्व्वेषु परमक्षय्यमेव च। भीष्म उवाच। छत्रोपानहमेतत्तु सूर्य्येणैतत् प्रवर्त्तितम्। पुण्यमेतदभिख्यातं त्रिषु लोकेषु भारत!। तस्मात् प्रयच्छ विप्रेषु छत्रोपानहमुत्तमम्। धर्म्मस्तेषु महान् भावी न मेऽत्रास्ति विचारणा। छत्रं हि भरतश्रेष्ठ! य प्रदद्याद्द्विजातये। शुभम् शतशलाकं वै स प्रेत्य सुखमेधते”। एतल्लक्षणं छत्रशब्दे वक्ष्यते।

**आतपवत्** त्रि० आतपोऽस्त्यत्र मतुप् मस्य वः। आतपयुक्ते “शृङ्गाणि यस्यातपवन्ति सिद्धाः” कुमा०।

**आतपवर्ष्य** त्रि० आतपे निमित्ते सति वर्षन्ति बा० कर्त्तरि यत्। वृष्टिजले “अन्तरिक्षात् प्रतिगृह्यातपवर्ष्याः” कात्या० १५,४,५, अन्तरिक्षात् ग्रहीतव्या आतपवर्षणाः या आतपे वर्षन्ति ताः। अन्तरिक्षात् प्रतिगृह्य भूमिपतनात् प्रागेवाकाशात् पतन्तीरादाय ग्रहीतव्या” कर्क०। अतएव वृष्टिजलस्यातपनिमित्तत्वात् नैमित्तिकत्वाभिप्रायेण तासां यज्ञकाले ग्रहणासम्भवेन पूर्व्वं संग्राह्यतोक्ता “यूपसुत्करेण नैमित्तिकसम्भवात्” कात्या० १५,४२